International Journal of Research in Social Sciences
Vol. 15 Issue 11, Nov 2025,
ISSN: 2249-2496 Impact Factor: 7.081 UGC Approved Journal Number: 48887
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

# ।। ज्योतिर्जगति कालः।।

-डॉ. विजयलक्ष्मी महापात्र,
सहायकाचार्या, ज्योतिषविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी, ओडिशा।

**"कलनाद् सर्वभूतानां स कालः परिकीर्तितः ।**
**अनादिरेष भगवान् कालोऽनन्तोऽजरः परः[1] ।।"**

कलयतीति काल इति व्युत्पत्या कालशब्दः संख्यापरिमिति पृथक्त्व संयोगादिषु अर्थषु प्रयुक्तो भवति। कालस्य महत्त्वमिह जगति सर्वाधिकं गुरुत्वपूर्णमस्तीति सिध्यति । तद्यथा-

**"कालः सृजति भूतानि कालः संहरते प्रजाः ।**
**कालः स्वपिति जागर्ति कालो हि दुरतिक्रमः ।।"**

पुनः-

**"कालः कलयते लोकं कालः कलयते जगत् ।**
**कालः कलयते विश्वं तेन कालोऽभिधीयते[2] ।।"**

ज्योतिषशास्त्रे कालस्यैव गणना ज्योतिर्पिण्डनक्षत्रादिबलेन क्रियते। कालविधानशास्त्रमिदं कालस्य सूक्ष्मावयवादारभ्य कल्पपर्यन्तमहत्कालखण्डस्य गणना एकसरणिवद्धपरम्परया प्रकाशते। यथोक्तं सूर्यसिद्धान्ते-

**"लोकानामन्तकृत्कालः कालोऽन्यः कलनात्मक ।**
**सद्विधा स्थूलसूक्ष्मत्वात् मूर्तश्चामूर्तमुच्यते [3]।।"**

अर्थात् कालो द्विविधः। एक लोकानामन्तकृत्काल अपर कलनात्मकः। अत्र कलनात्मककालः द्विधा विभज्यते, एको स्थूलकालो मूर्तश्चोच्यते, अपरः सूक्ष्मः अमूर्तश्च। तद्यथा सिद्धान्ततत्त्वविवेके -

**"भूतानामन्तकृत्कालः कालोऽन्यः कलनात्मकः।**
**सद्विधा स्थूलसूक्ष्मत्वान्मूर्तश्चामूर्त संज्ञकः [4]।।"**

[1] विष्णुपुराणे- १/२/१४
[2] शब्दकल्पद्रुमे
[3] सूर्यसिद्धान्ते, मध्यमाधिकारे श्लो. सं १०
[4] सिद्धान्ततत्त्वविवेके -मानाध्याये – श्लो.सं. -१४-१५

अत्र गणनात्मको यः स्थूलकाल तत् लोकव्यवहारे प्रचलति परन्तु त्रुट्यादयोऽभूतकालस्तु लोकव्यवहारे नावलोक्यते। श्रीमता भास्कराचार्येण कालमानानां विभागकल्पनावसरे अतीव समीचीनतया आदौ सूक्ष्मकालस्य तदनन्तरं स्थूलकालस्य सपरिमाणं विभागीकरणं कृतम्। तद्यथा-

**"योऽक्ष्णोर्निमेषस्य खरामभागः सतत्परस्तच्छतभागउक्ता।**
**त्रुटिर्निमेषधृतिभिश्च काष्ठा तत् त्रिंशतासद्गणकैः कलोक्ता॥**
**त्रिंशत्कलाऽऽर्क्षी घटिकाक्षणः स्यान्नाडीद्वयं तै खगुणैर्दिनं च।**
**गुर्वक्षरैः खेन्दुमितैरसुस्तै षड्भिः पलं तैर्घटिका खषड्भिः॥**
**स्याद्वा घटी षष्टिरह खरामैर्मासो दिनैस्तैर्द्विकुभिश्चवर्षम्।**
**क्षेत्रे समाद्येन समाविभागाः स्युश्चक्रराश्यंश कलाविलिप्ताः[5]॥"**

अर्थात् यो अक्ष्णोः लोचनयोः पक्ष्मपातः कालस्तस्य निमेषसंज्ञा। अस्य निमेषस्य त्रिंशद्भागः तत्परः। तत्कालखण्डस्य शतांशः त्रुटिः। एतत् सूक्ष्मकालस्य विभागो वर्तते। स्थूलकालस्य विभागकरणे अष्टादशभिः निमेषैरेका काष्ठा भवति तद्यथा सूर्यसिद्धान्ते -

**"षड्भिः प्राणैर्विनाडी स्यात् तत्षष्ट्या नाडिका स्मृता।**
**नाड़ी षष्ट्या तु नाक्षत्रमहोरात्रं प्रकीर्तितम्।**
**तत्त्रिंशता भवेन्मासः सावनऽर्कोदयैस्तथा [6]॥"**

तत्र प्राणकालस्य परिभाषा वृद्धवशिष्ठसिद्धान्ते उक्तं यथा-

**"दशगुर्वक्षरोच्चारणकालः प्राणऽभिधीयते। तत्षटकैश्चपलं षष्ट्या नाड़ी षष्ट्यार्क्षंजं दिनम् [7]॥"**

भारतीयज्योतिषशास्त्रस्य सिद्धान्ते ब्राह्मं, दिव्यं, पैत्र्यं, प्राजापत्यं, गौरवं, सौरं, सावनं चेति कालस्य नवविधमानानि प्रतिपादितानि सन्ति। तेषां सौर-सावन-चान्द्र-नक्षत्राणां च मानान्येव साम्प्रतं उपयोगाय दृश्यते। यथोक्तं-

**"ब्राह्म दिव्यं तथा पैत्र्यं प्राजापत्यं च गौरवम्।**
**सौरं च साबनं चान्द्रमार्क्ष मानानि वै नव।**
**चतुर्भि व्यवहारोऽत्र सौरचान्द्रार्क्षसावनैः[8]॥"**

[5] सिद्धान्तशिरोमणौ- कालमानाध्याये – श्लो.सं. -१६-१७
[6] . सूर्यसिद्धान्ते- मध्यमाधिकारे श्लो.सं. ११,१
[7] . वृद्धवशिष्टसिद्धान्ते
[8] सूर्यसिद्धान्त -मानाध्याये – श्लो.सं. -१,२

एवं नवविधमानानां प्रमाणं पृथक् पृथक् भवति, सर्वेषां त्रिंशद् दिनानां मासः मासानां च दशभिः वर्षं भवतीति सर्वप्रसिद्धनियमः। पूर्वोक्तनवविधकालमानेषु केवलं नाक्षत्रमानमेव स्थिरसमरूपं भवति। अन्यानि सर्वाणि मानानि विद्वद्भिः चलरूपेण स्वीकृतानि सन्ति।

तत्र ब्रह्मसम्बन्धी ब्राह्मं, दिविसम्बन्धी दिव्यं, पितृणामिदं पैत्र्यं, प्रजापतेरिदं प्राजापत्यं, गुरोरिदं गौरवं सूर्यसम्बन्धीदं सौरं, भूमेरिदं सावनं, चन्द्रस्येदं चान्द्रं, नक्षत्रसम्बन्धी नाक्षत्रमिति प्रसिद्धानि नवविधकाल-मानानि ज्योतिषशास्त्रस्य मूलाधारत्वेनाख्यातानि सन्ति।

**१.ब्राह्ममानम् -**

चतुर्युगसहस्रेण सकलचराचरजीवानां प्रलयकृत् कल्पो भवति। तावत् परिमितस्य कालखण्डस्प ब्रह्मणो दिनमेकं भवति। तावत्प्रमाणस्य कालस्य ब्रह्मणः रात्रिरिति विषये समेषामाचार्याणां गतसाम्यमवलोक्यते। यथोक्तं सूर्यसिद्धान्ते-

**"इत्थ युगसहस्रेण भूतसंहारकारकः ।**
**कल्पो ब्राह्ममहः मोक्तं शर्वरी तस्य तावती[9] ।।"**

विषयेऽस्मिन् सामन्तचन्द्रशेखरेणाप्युक्तं यत्

**"शरेन्दुभिः सन्धिभिरन्वितैस्तैर्मन्वन्तरैः स्यादशभिश्चतुर्भिः।**
**दिनं विधेः कल्प इति श्रुत तद् युगैः सहस्रेण मितं निशापि [10]।।"**

**२. दिव्यमानम् -**

देवासुराणां यदहोरात्रमुक्त तदेव दिव्यमानमुच्यते। यथोक्त सूर्यसिद्धान्ते-

**"मासै द्वादशभिः वर्षं दिव्यं तदह उच्यते ।।[11]"**

देवा सुमेरौ तथा दैत्या कुमेरौ निवसन्ति, इति पुराणादिषु प्रसिद्धमस्ति। ज्योतिषशास्त्रेऽपि देवानां दैत्यानां संस्थितिः वर्णितोऽस्ति । तद्यथा-

**"सौम्ययाम्ये ध्रुवस्थाने खमध्ये देवदैत्ययोः [12]।।"**

वस्तुतस्तु **"दिनं दिनेशस्य यतोऽत्रदर्शने तमी तमोहन्तुरदर्शने सति"** इति दिनरात्रिपरिभाषया क्षितिजोर्ध्वस्थे रवौ दिनं एवं क्षितिजाधस्थे रवौ रात्रिः। एवं प्रकारेण देवासुराणां षष्ट्यधिकशतत्रयतुल्यैर्मानवदिवसैः देवासुराणामहोरात्रं भवति। तद्यथा भास्कराचार्येण-

**"रवेश्चक्रभोगोऽर्कवर्षं प्रदिष्टं द्युरात्रं च देवासुराणां तदेव[13] ।।"**

[9]. सूर्यसिद्धान्ते -मध्यमाधिकारे श्लो. सं. २०
[10] सिद्धान्तदर्पणे
[11] सूर्यसिद्धान्ते- मध्यमाधिकारे- श्लो.स. -१३
[12] सिद्धान्तशिरोमणौ- गोलाध्याये -भुवनकोश -श्लो.स.-५१
[13] सिद्धानशिरोमणौ- कालमानाध्याये-श्लो.स.-१९

**International Journal of Research in Social Sciences**
**Vol. 15 Issue 11, Nov 2025,**
**ISSN: 2249-2496 Impact Factor: 7.081 UGC Approved Journal Number: 48887**
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

अपि च कमलाकरेण-

**"रवेश्चक्रैकभोगोऽत्र रविवर्षं तदेव हि।**
**देवानामसुराणां तु द्युरात्रं तु विपर्ययात्[14] ।।"**

पुनः सूर्यसिद्धान्ते -

**"सुरासुराणामन्योन्यमहोरात्रं विपर्ययात्।**
**तत्षष्टिषड्गुणा दिव्यं वर्षमासुरमेव च [15]।।"**

### ३. पैत्रमानम् -

**पितृणामिदं पैत्रं तत्सम्बन्धिमानं पैत्रमानमुच्यते। "अमान्तादमान्तं तु यावत् स चान्द्रः [16]।।**

इत्यनेन एकस्मिन् चान्द्रमासे अमान्तादमान्तं यावत् त्रिंशच्चान्द्रतिथयो भवन्ति। तासां त्रिंशच्चान्द्रतिथीनां पितृणामेकं अहोरात्रं जायते। तद्यथा सूर्यसिद्धान्ते-

**"त्रिंशता तिथिभिर्मासश्चान्द्र पित्र्यमहः स्मृतम् ।**
**निशा च मासपक्षान्तौ तयोर्मध्ये विभागतः[17] ।।"**

यतः पितरः चन्द्रपृष्ठे निवसन्ति, अतो यत् अस्माकं एक चान्द्रमासः सः पितृणामेकं द्युनिशं भवति। यथोक्तं, सिद्धान्तशिरामणौ-

**"विधूर्ध्वभागेपितरो वसन्तः स्वाधः सुधादीधितिमामनन्ति ।**
**पश्यन्ति तेऽर्कं निज मस्तकोर्ध्वं दर्शयतोस्माद्युदलं तदैषाम् ।।**
**भार्धान्तरत्वानन विधोरधस्थ तस्मान्निशीथ खलु पौर्णमास्याम्।**
**कृष्णे रविः पक्षदलेऽभ्युदेति शुक्लेऽस्तमेत्यर्थत एव सिद्धम् [18]।।"**

एवं दर्शान्ते पितृणां दिनार्धकाल तथा पूर्णिमान्ते तेषां रात्र्यर्द्धकालो भवति। कृष्णपक्षसार्द्धसतमपितृणां दिनारम्भः एवञ्च शुक्लपक्षसार्द्धसप्तम्यां निशारम्भो भवति। पूर्ववदेवरीत्या मास-वर्षादयः सिद्ध्यन्ति।

### ४. प्राजापत्यमानम्-

प्रजापतिसम्बन्धिमानमेव प्राजापत्यमानम् । अस्य सर्वोत्तमा परिभाषा सूर्यसिद्धान्ते प्राप्यते । तद्यथा -

---

[14] सिद्धान्ततत्त्वविवेकः- मध्यमाधिकार -मानाध्याये- श्लो.सं. २५.५
[15] सूर्यसिद्धान्ते – मध्यमाधिकारे- श्लो.सं.- १५
[16] सूर्यसिद्धान्ते- मानाध्याये श्लो.सं. २३
[17] सूर्यसिद्धान्ते- मानाध्याये-श्लो. स.-१४
[18] सिद्धान्तशिरोमणौ- गोलैध्याये-त्रिप्रश्नवासना- श्लो.स.- १३

**International Journal of Research in Social Sciences**
**Vol. 15 Issue 11, Nov 2025,**
**ISSN: 2249-2496 Impact Factor: 7.081 UGC Approved Journal Number: 48887**
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

**"मन्वन्तरव्यवस्था च प्राजापत्यमुदाहृतम् [19]।।"**

अर्थात् मन्वन्तरस्थितिः तुल्यमेव प्राजापत्यमानमार्यैरुदाहृतम्। यतोहि मनवः प्राजापत्यंशेन समुद्भवाः यावदेकस्य मनोः कालमानं भवति तत्तुल्यमानं प्रजापतिमानं भवति। उच्यते-

**"युगानां सप्ततिसैका मन्वन्तरमिहोच्यते [20]।।"**

अर्थात् एकसप्ततिमहायुगैः एकमनोः कालमानं भवति। अत्र एकस्मिन् महायुगे 12000 दिव्यवर्षाणि,तथा 43,20000 सौरवर्षाणि भवन्ति । अत्रोक्तं यत् प्राजापत्यमानं देवादिमानवत् दिनरात्रिविभागो न लभ्यते।

**५.गौरवमानम्-**

गौरवमानस्य निर्माणं गुरुराशिसञ्चारवशेन भवति। वशिष्ठवचनात् मध्यमबृहस्पतेरेकराशिभोगकालो गौरववर्षं भवति। तेन क्रमेण षष्टिसंवत्सराणां व्यवहारोऽपि भवति। इति भास्करोक्तवचनात् **"बृहस्पतेर्मध्यमराशिभोगात् संवत्सरं सांहितिकाः वदन्ति। [21]।।"** सूर्यसिद्धान्तमतेन गुरोर्मध्यमगत्या राशिभोगकालो गौरवर्षं कथ्यते। अत्र विजयादिषष्टि सम्बत्सराणां क्रमः सिद्धयति। परं बृहत्संहितादिषु संहिताग्रन्थेषु तथा नरपतिजयचर्यादिषु स्वरशास्त्रेषु षष्टिसम्बत्सराणां क्रमः प्रचलितो दृश्यते । तत्र सम्वत्सरानयनक्रमः यथा-

**"शकेन्द्रकालः पृथगाकृतिघ्नः शशाङ्कनन्दाश्वियुगैः समेतः ।**
**शराद्रिवश्विन्दुहृतः सलब्धः षष्ट्याप्तशेषे प्रभावादयोऽब्दाः[22] ।।"**

अयं प्रभवादिगणनाक्रमः समागतः । इदानीं सिद्धान्तोक्तगौरवसम्बत्सरानयनप्रकारः सर्वादौ समुपस्थाप्यते। तद्यथा -

**"द्वादशघ्ना गुरोर्याता भगणावर्त्तमानकैः ।**
**राशिभिः सहिताः शुद्धा षष्ट्यास्युर्विजयादय[23] ।।"**

अर्थात् गुरोः यातं भगणमानं द्वादशभिः विभाज्यते तदा लब्धं शेषफल वर्तमानविजयसंवत्सराणां संख्यां द्योतयति। अत्र एकस्मिन् गौरवसम्बत्सरे ३६१.०२६७२ सावनदिनानि भवन्ति। अत एकस्मात् सौरवर्षात् संवत्सरे ४.२३२०३ सावनदिनानि लघुनि एवञ्च एकस्मात् सावनवर्षात् १०२६७२ सावनदिनानि महान्ति भवन्तीति अनुक्तमप्युक्तम्।

---

[19] सूर्यसिद्धान्ते- मानाध्याचे श्लो. सं.- २१
[20] सूर्यसिद्धान्ते मध्यमाधिकारै श्लो.सं-१८
[21] सिद्धान्तशिरोमणौ- मध्यमाधिकारे -कालमानाध्याये- श्लो सं. ३०
[22] श्रीजगन्नाथपञ्चाङ्गे प्रतिपादितं सम्वत्सरानयनम्,पृ.सं-.9
[23] सूर्यसिद्धान्ते -मध्यमाधिकारः- श्लो.स.- ५५

**International Journal of Research in Social Sciences**
**Vol. 15 Issue 11, Nov 2025,**
**ISSN: 2249-2496 Impact Factor: 7.081 UGC Approved Journal Number: 48887**
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

## ६. सौरमानम् -

सूर्येण समुत्पन्नामानमेव सौरमाननाम्ना व्यवह्रियते। अर्थात् सूर्यस्येद सौरमिति सौरमानारम्भः सूर्यसंक्रमाद् भवति। एकस्मात् राशितः सूर्यस्य अपरस्मिन् राशौ प्रवेशः सूर्यसंक्रमणमुच्यते। तस्मात् सूर्यसंक्रान्तितःसौरमासादेः विचारः समुचित एव । यतः-**"संक्रान्त्या सौरोच्यते**[24] **।"**भारतीयज्यौतिषस्य प्राचीनपरम्परानुसारेण सूर्यस्य भ्रमणमार्गः क्रान्तिवृत्तमित्युच्यते। अस्यैव क्रान्तिवृत्तस्य द्वादशतमो भागः राशिरिति उच्यते। तद्यथा-

**"भवलयस्य किलार्कलवाः समाः किमसमैः समयैः खलु राशयः** [25]**।।"**

अर्थात् एकस्मिन् राशौ यावत् सूर्यः तिष्ठति तावत्मकस्य कालस्य सौरमाससंज्ञा । तद्यथा-

**"रवेश्चक्रभोगोऽर्कवर्षं प्रदिष्टं द्युरात्रश्च देवासुराणां तदेव** [26]।।" इति ।

अस्मिन् भचक्रे (क्रान्तिवृते) षष्ट्यधिकत्रिंशदंशाः भवन्ति। अतः क्रान्तिवृत्तस्य एकांशभोगकालस्य एकं सौरदिनमुच्यते ।

७. सावनमानम् - नवविधकालमानेषु दिवसस्य विचारः सावनमानेन कर्तव्यमिति शास्त्रकारणामभिमतम् । उक्त यत् - **"इनोदयद्वयान्तर तदर्कं सावनं दिनम् । तदेव मेदिनीदिनं भवासरस्तु भभ्रमः**[27] **।।'** सूर्यसिद्धान्तेऽपि -**"उदयादुदयं भानोः भूमिसावनवासरः**[28]**।।"** तत्र सूर्योदयद्वयान्तवर्तिकालस्य सावनदिनमिति संज्ञा । अत सावनदिनस्य मानं सर्वदा समानं न भवति। यतो हि सर्वदा एकस्मिन् एव स्थाने समाने एव काले सूर्योदयो न भवति। अत सावनदिवसानां मानेषु समानत्वमसम्भवम् । अस्मादेव कारणात् ग्रहस्फुटीकरणप्रसङ्गे अहर्गणानयनं मध्यमसावनमानेन क्रियते यतः स्फुटसावनं सर्वदा एकरूपकं न भवति। तद्यथा भास्कराचार्येण-

**"अहर्गण मध्यमसावनेन कृतश्चलत्वात् स्फुटसावनस्य ।**
**तदुत्थ खेटा उदयान्तराख्यकर्मोद्भवेनोनयुताः फलेन**[29] **।।"**

सावनमानस्य व्यवहारप्रसङ्गे प्रोक्तम् -

**"सूतकादिपरिच्छेदो दिनमासाब्दपस्तथा।**
**मध्यमा ग्रहभुक्तिस्तु सावनेनैव गृहते**[30]**।।"**

---

[24] सूर्यसिद्धान्ते -मध्यमाधिकारः- श्लो.स.-१३
[25] सिद्धान्तशिरेमणौ- गोलस्वरुपप्रश्नाध्यायः- श्लो.स.-७
[26] सिद्धान्तशिरोमणौ- मध्यमाधिकारै- कालमानाध्याये- श्लो.स.-१९
[27] सिद्धान्तशिरोमणौ- मध्यमाधिकारे -कालमानाध्याये -श्लो.सं. २०
[28] सूर्यसिद्धान्ते- माध्यमाधिकार-श्लो. स.-५५
[29] सिद्धान्तशिरोमणौ – गोलाध्याये- मध्यगतिवासना-श्लो.सं. १९
[30] सूर्यसिद्धान्ते मानाध्याये-श्लो.सं.-१९

International Journal of Research in Social Sciences
Vol. 15 Issue 11, Nov 2025,
ISSN: 2249-2496 Impact Factor: 7.081 UGC Approved Journal Number: 48887
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

## ८. चान्द्रमानम्-

मानमिदं चन्द्रवशात् उत्पद्यते। अतो चान्द्रमिति संज्ञा विहिता। चान्द्रमानस्य सर्वात्मना परिभाषा सूर्यसिद्धान्ते

**"अर्काद् विनिस्सृतः प्राचीं यद्यात्यहरहः शशी।**
**तच्चान्द्रमानमंशैस्तु ज्ञेया द्वादशभिस्तिथिः[31]।।"**

सूर्यचन्द्रयोरेकत्र संयुतिः अमान्त इत्युच्यते। यतः- "रवीन्द्वोर्युतिः संयुतिर्यावदन्या विधोर्मास एतच्च पैत्रं द्युरात्रम्।।[32]"

तस्मादमान्तकालात् द्वितीयममान्तकालं यावत् त्रिंशत्तिथयो भवन्ति। तावात्मकस्य कालस्य एकश्चान्द्रमासः। पुनः- **"दर्शावधिश्चान्द्रसमो हि मासः, सौरस्तु संक्रान्त्यवधिर्यतोऽतः [33]।।"** अत एकस्मिश्चान्द्रमासे सावनदिनसंख्यां निरूपयन् श्रीमान् भास्कराचार्यः-

**"कालेन येनैति पुनः शशिनं क्रामन् भचक्र विवरेण गत्योः।**
**मासः स चान्द्रोऽङ्कयमा कुरामाः पूर्णेषवस्तत्कुदिनं प्रमाणम् [34]।।"**

अत्रोपस्थित प्रसङ्गेण ज्ञायते यत् अमान्तद्वयान्तर्वर्त्तिकालो चान्द्रमास एवञ्च अनयोर्मध्ये त्रिंशत् तिथयो भवन्ति, एवं त्रिंशत् विभाजते सति चान्द्रमासः चान्द्रदिने परिणमति। एवमत्र सिद्ध्यति यत् एकतिथिमानमेव चान्द्रदिनमिति। अर्थात् २९/३१/५० कुदिनात्मको चान्द्रमासो भवति। एवमेव चान्द्रवर्षे ३५४.२२ सावनानि दिनानि भवन्ति। चान्द्रमासस्य व्यवहारप्रसङ्गे उक्तं यत्-

**"तिथि करणमुद्वाहः क्षौर सर्वक्रियास्तथा।**
**व्रतोपवासयात्रायां क्रिया चान्द्रेण गृह्यते [35]।।"**

## ९. नाक्षत्रमानम्-

नक्षत्रेण उत्पन्नमान नाक्षत्रमान भवति। यथोक्त सूर्यसिद्धान्ते-"भचक्रभ्रमणं नित्यं नाक्षत्रदिनमुच्यते [36]।" तत्र भचक्रस्य अर्थात् नक्षत्रद्वयान्तवर्तिकालस्य नक्षत्रदिनमिति संज्ञा। यतः **"भवासरस्तु भभ्रमः** [37]।। नाक्षत्रषष्टिघटिकाभिः एकं नाक्षत्रदिनं भवति। एतस्मिन् माने कदापि परिवर्त्तनं न भवति। षष्ट्याघटीनां सदैव नाक्षत्रदिनं भवति। तद्यथा-

[31] सूर्यसिद्धान्ते मानाध्याये-श्लो.स.-३३
[32] सिद्धानाशिरोमणौ- गोलाध्याये- मध्यगतिवासना -श्लो.स. २०
[33] सिद्धान्तशिरोमणौ -गोलाध्याये- मध्यगतिवासना -श्लो.स. १६
[34] सिद्धान्तशिरोमणौ- गोलाध्याये -मध्यगतिधाराना श्लो.स.-९
[35] सूर्यसिद्धान्तै -मानाध्याये-श्लो.स.-१३
[36] सूर्यसिद्धान्तै -मानाध्याये-श्लो.स.-१५
[37] सिद्धान्तशिरोमणौ- मध्यमाधिकारे- कालमानाध्याये - श्लो.सं. २०

**Vol. 15 Issue 11, Nov 2025,**
**ISSN: 2249-2496 Impact Factor: 7.081 UGC Approved Journal Number: 48887**
Journal Homepage: http://www.ijmra.us, Email: editorijmie@gmail.com
Double-Blind Peer Reviewed Refereed Open Access International Journal - Included in the International Serial Directories Indexed & Listed at: Ulrich's Periodicals Directory ©, U.S.A., Open J-Gate as well as in Cabell's Directories of Publishing Opportunities, U.S.A

**"षष्ट्याघटीनां भदिनं सदार्क्षा तद् भुक्तितुल्यासु युतं खरांशोः।**
**स्यान्मध्यमं सावनमेवमब्दे तत् संख्यका भभ्रमतो निरेका [38]।।"**

यतः विष्णुधर्मोतरपुराणे प्रतिपादितमस्ति यत्-

"चन्द्रनक्षत्रभोगेन नाक्षत्रं दिनमुच्यते। नाक्षत्रमानप्रयोगे प्राप्यते यत्-

**"कार्तिक्यादिषु संयोगे कृत्तिकादिद्वयं द्वयम्।**
**अन्त्योपान्त्यौ पञ्चमश्च त्रिधा मासत्रयं स्मृतम् [39]।।"**

एवं विधानां नवविधकालमानानां वर्णनमस्माकं ज्यौतिषशास्त्रे प्राप्यते। अत्र सौर-सावन-नाक्षत्र-चान्द्राणां मुख्यत्वेन मानवव्यवहारोपयोगिनो भवन्तीति। एषु वर्षायनर्त्तुयुगादीनां विचारः सौरमानानुसारेण, मास-तिथ्यो विचारः चान्द्रमानानुसारेण, दिनन्तथा व्रतसंस्कारकर्मसूतकादीनि सावनमानेन, घट्यादीनां विचारस्तु नाक्षत्रमानानुसारेण कर्तव्यमिति सिद्धान्तः। तद्यथा-

**"वर्षायनर्त्तुयुगपूर्वकमत्रसौरान् मासास्तथा च तिथयस्तुहिनांशुमानात्।**
**यत्कृच्छ्रसूतकचिकित्सितवासराद्यं तत्सावनञ्च घटीकादिकमार्क्षमानात् [40]।।"**

**सन्दर्भग्रन्थसूची-**

1. सूर्यसिद्धान्तः,डॉ.सत्येन्द्रमिश्रः, चौखम्बासंस्कृतभवन,वाराणसी
2. सिद्धान्तशिरोमणौ- गोलाध्याये, बापूदेवशास्त्री, चौखम्बासंस्कृतसंस्थान
3. श्रीजगन्नाथपञ्चाङ्गे, वर्ष-26, 2025
4. सिद्धान्ततत्त्वविवेकः, पं कृष्णचन्द्र द्विवेदी, संपूर्णानन्दग्रन्थमाला
5. सिद्धान्तदर्पणम्, धर्मग्रन्थ स्टोर,कटक

**=000=**

[38] सिद्धान्तशिरोमणौ- गोलाध्याये- मध्यगतिवासना श्लो.स.- ७

[39] सूर्यसिद्धान्तः- मानाध्याये-श्लो.स.-१६

[40] सिद्धानाशिरोमणौ – मध्यमाधिकारे- कालमानाध्याये श्लो. स.-३१